संस्कृतवार्ता:

दिनाङ्क :-12.02.2025 प्रात: - 06:55

## अथ वार्ताः

### भारत-फ्रांसदेशौ

प्रधानमन्त्री नरेन्द्रमोदी फ्रांसदेशस्य च राष्ट्रपति: इमैनुएल-मैक्रों इत्येष: पेरिस-नगरे चतुर्दशमं भारत-फ्रांस-सीईओ-फोरम-इत्येनं मञ्चं सम्बोधितवन्तौ। यस्मिन् उभौ नेतारौ व्यावसायिक-सम्बन्धान् प्रबलीकर्तुं नवाचारं वर्धयितुं स्वप्रतिबद्धतां पुष्टिं कृतवन्तौ। एतस्मिन् मञ्चे उभयो: देशयो: शीर्षा: उद्योगजगत: नेतार: एकत्रिता: समभवन्। स्वसम्बोधने प्रधानमन्त्रीमोदी वैश्विक-निवेश-केन्द्रत्वेन भारतस्य उदीयमानम् आकर्षणं प्रख्यापितवान्। अपि च अस्य स्थिरनीतिषु आर्थिक-परिष्कारेषु च बलं प्रदत्तवान्।

### प्रधानमन्त्री-कृत्रिम-बुद्धिमत्ता

प्रधानमन्त्रिणा नरेन्द्रमोदिना नैतिकशासन-समावेशिविकास-इत्यनयोः आवश्यकता रेखाङ्किता कुर्वता कृत्रिम-बुद्धिमत्तायाः परिवर्तनकारिणी शक्तिः सबलतया प्रतिपादिता। निर्णायकशक्तित्वेन अस्या: महत्ता प्रोक्ता याहि अस्याम् शताब्द्यां मानवतायेयी कूटसङ्ख्यां लिखति। श्रीमोदी ह्य: पेरिस-नगरे **एआई एक्शन समिट** इत्यस्मिन् कार्यक्रमे वक्तव्यमिदं कथितवान्। असौ फ्रांसदेशस्य राष्ट्रपतिना इमैनुएल-मैक्रों इत्यनेन सह **एआई एक्शन समिट** इत्यस्य शिखर-सम्मेलनस्य सहाध्यक्षतां कुर्वन् आसीत्। प्रधानमन्त्री अत्रावसरे अर्थव्यवस्था-सुरक्षा-समाजेषु एआई इति कृत्रिम-बुद्धिमत्तायाः दूरगामि-प्रभावान् प्रकाशितवान्। सः सबलं प्रोक्तवान् यत् कृत्रिम-बुद्धिमत्ता अभूतपूर्व-गत्या विकसिता भवति अत एव कृत्रिम-बुद्धिमत्तायाः दायित्वपूर्णं शासनं सुनिश्चितं कर्तुं सामूहिक-वैश्विकप्रयासस्य आवश्यकता वर्तते।

### गृहमन्त्री-जम्मूकश्मीरम्

केन्द्रीयगृहमन्त्री अमितशाह: गुप्तसूचनानां सङ्कलने प्रौद्योगिक्या: महत्त्वं पुनरावर्तितवान्। गृहमन्त्री प्रावोचत् यत् आतङ्कवादस्य वित्तपोषणस्य निरीक्षणं नार्को-आतङ्कवादस्य प्रसङ्गेषु नियन्त्रणस्य सुदृढीकरणम् अपि च जम्मूकश्मीरराज्ये सम्पूर्णतया आतङ्ककीय-पारिस्थितिक-तन्त्रस्य नष्टीकरणञ्च प्रधानमन्त्रिण: प्रशासनस्य प्राथमिकता: वर्तन्ते। ह्य: नवदिल्ल्यां जम्मूकश्मीरे सुरक्षा-परिदृश्यस्य समीक्षायै उच्चस्तरीयोपवेशनानाम् अध्यक्षतां कुर्वन् गृहमन्त्री कथिवान् यत् सर्वा: सुरक्षासंस्था: जागरुका: भवेयु: अथ च जम्मूकश्मीरे आतङ्कवादस्य उन्मूलनाय सहक्रियात्मकरूपेणकार्यं कुर्वन्तु इति आदेशं प्रख्यापितवान्।

### माघपूर्णिमा-स्नानम्

अद्य तीर्थराजे प्रयागराजे महाकुम्भस्य माघ-पूर्णिमा-स्नानं प्रचलति। स्नानमिदं महत्त्वपूर्णं स्थानं भजते यतो हि कल्पवासस्य विशिष्टानुष्ठानस्य समापनस्य प्रतीकं विद्यते। अस्मिन् वर्षे भव्ये महाकुम्भोत्सवे दशलक्षाधिका: कल्पवासिन: तत्र निवसन्ति। परम्परानुसारि मान्यता इयमस्ति यत् प्रयागराजे सङ्गमतटे माघमासस्य पूर्णिमां यावत् निवसन्त: कल्पवासिन: सहस्राधिक-वर्षाणां तपस: फलं मिलन्ति।

### विदेशमन्त्री-सीईओ-फोरम्

विदेश-मन्त्री डॉ. एस्.जयशङ्करः एआई इत्यस्य नवान्वेषणविषयस्य च कृते वैश्विक-समावेशी-दृष्टिकोणस्य महत्त्वं अधोरेखितवान्। सः प्रमुखक्षेत्रेषु भारत-फ्रान्सयो: तथा च भारत-यूरोपीय-सहयोगं सुदृढं कर्तुं, उत्पादनस्य विविधीकरणं, स्थितिस्थापकानां आपूर्तिशृङ्खलानां निर्माणम् इत्यादीनां विषये अवदत्। डॉ. जयशङ्करः अवदत् यत् द्वैपाक्षिकसम्बन्धस्य परिपक्वतायाः अनुगुणं भारत-फ़्रान्स्-देशयोः मध्ये व्यापारस्य भूमिका विस्तृता अस्ति इति।

### स्नूकर-क्रीडा-आडवाणी

भारतस्य सफलयुत: क्रीडक: पङ्कजआडवाणी पुनरेकवारं स्वप्रतिभाया: परिचयं दत्त्वा भारतीय-स्नूकर-चैम्पियनशिप-प्रतियोगितायां स्वकीयां षड्-त्रिंशत्तमां राष्ट्रियोपाधिं प्राप्तवान् अथ च मध्यप्रदेशस्य यशवन्त-क्लब इत्यत्र दशमं पुरुषाणां स्नूकर इति उपाधिम् अधिगतवान्।

।। इति वार्ता:।।